दिनाङ्क :- 10.03.2026

प्रात: - 06:55

**पीएम- यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी श्वः केरल-तमिलनाडु-राज्ययोः यात्रां विधास्यति । केरल-राज्ये सः अपराह्णे सार्धद्वि वादने एर्नाकुलम्-नगरे प्रायः अष्टशतोत्तर दशसहस्र कोटि-रूप्यकाणां बहुविध-विकासात्मक-परियोजनानां उद्घाटनं, राष्ट्राय समर्पणं, शिलान्यासं, ध्वजारोहणं च करिष्यति। कार्यक्रमावधौ श्रीमोदी जनसमूहम् अपि सम्बोधयिष्यति। तत्पश्चात् तमिळुनाडुराज्ये, प्रधानमन्त्री तिरुचिरापल्ल्यां प्रायः पंचसहस्र कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनं, राष्ट्राय समर्पणं, शिलान्यासं च करिष्यति।

**प्रधानमन्त्री – नेपाल**

प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रिय-स्वतन्त्र-दलस्य अध्यक्षं रबी-लमिछाने इत्येनं, आर्. एस्. पि. इत्यस्य वरिष्ठं नेतारं बालेन्द्र-शाह् इत्येनं च निर्वाचनविजयाय, नेपाल-निर्वाचने आर्. एस्. पि. इत्यस्य सफलतायै च अभिनन्दयत्। तेन सह दूरभाषया वार्तालापं कुर्वन्, श्रीमोदी, तेषां आगामिनूतन प्रशासनस्य कृते शुभाशयाः प्रेषितवान् तथा च उभयदेशयोः परस्परसमृद्धेः, प्रगतेः, कल्याणस्य च कृते तेन सह कार्यं कर्तुं भारतस्य प्रतिबद्धतां च सूचितवान्। संयुक्तप्रयासेण आगामिषु वर्षेषु भारत-नेपालयोः सम्बन्धः नूतनम् औन्नत्यं प्राप्स्यति इति प्रधानमन्त्री दृढविश्वासं प्रकटितवान्।

**लोकसभा जयशंकर पश्चिमेशिया**

विदेशमन्त्री डॉ. एस. जयशंकर: सबलं प्रत्यपादयत् यत् पश्चिमैशिया-क्षेत्रे आपीडं न्यूनीकर्तुं मन्त्रणा कूटनीतिश्च समवलम्बनीया। पश्चिम-एशिया-क्षेत्रस्य स्थिति-विषये अवर-सदने प्रदत्ते स्वीये वक्तव्ये डॉ. एस. जयशंकर प्रावोचत् यत् भारत-सर्वकारेण गत-मासस्य विंशे दिनाङ्के तत्रत्य-स्थिति-विषये एकं वक्तव्यं प्रकाशितं, यस्मिन् गभीर-चिन्ता व्यक्तीकृता। साकमेव तत्र आपीड-प्रसङ्गे सम्बद्धाः सर्वेSपि पक्षा: संयमं सन्धारयितुम् अध्यर्थिता: सन्ति। तेनोक्तं यत् भारतस्य मतम् अस्ति यत् आपीडस्य न्यूनीकरणार्थं मिथो मन्त्रणाया: कूटनीतेश्च च आश्रय: आश्रयणीय:।

**बाइट-जयशंकर ऑन इंडिया स्टेंड– 29 से.**

विदेशमन्त्री न्यगादीत् यत् एषः प्रवर्तमान: संघर्षः भारताय अपि विशेष-चिन्तायाः विषयः अस्ति, यतोहि भारतमपि समीपस्थ-क्षेत्रे स्थितम् अस्ति। असौ उदैरयत् यत् विदेश-मन्त्रालयेन स्थिते: परीक्षणार्थं प्रश्नानाम् उत्तरार्थं च विशेषः नियन्त्रण-कक्षः स्थाप्यते। तेन एतदपि प्रोक्तं यत् ह्यस्तन-पर्यन्तं प्राय: सप्त-षष्टि-सहस्र-परिमिता: भारतीय-नागरिकाः देशे प्रत्यागताः सन्ति। अमुना वक्तव्यमिदं विपक्षस्य तुमुल-कोलाहल-मध्ये प्रदत्तं। ध्येमस्ति यद् इमे विपक्ष-जना: एतस्मिन् प्रकरणे चर्चाया: याचनां कुर्वन्तः अवर्तन्त। डॉ. जयशंकरः राज्यसभायाम् अपि एतदेव वक्तव्यं दत्तवान्।

**लो. स. एल. पी. जी. सम्पर्कः**

सर्वकारेण अद्यावधि प्रधानमन्त्री-उज्ज्वला-योजनान्तर्गतं निर्धन-परिवाराणां महिलानां कृते सार्धदशकोट्यधिक- एल. पी. जीति वात्यन्धन-सम्पर्कं प्रदत्तमस्ति। योजनेयं षोडशोत्तरद्विशततमवर्षस्य मे-मासे आरब्धा, यस्योद्देश्यं सम्पूर्णे देशे महिलाभ्यः निक्षेपमूल्यरहितं एल पी जीति वात्यन्धन-सम्पर्कं प्रदानाय आसीत्। पेट्रोलियम-प्राकृतिकवात्यन्धन-राज्यमन्त्री सुरेशगोपीत्येषः राज्यसभायां एकस्य प्रश्नस्य लिखितोत्तरे उक्तवान्।

सः अवदत् यत्, अस्याः योजनायाः परिणामेन पारम्परिक-पाकपद्धतीनां परिवर्तनं जातम्, यासु जनाः इतः पूर्वं काष्ठ-गोमयेन्धन-सस्यावशिष्टादीनि घन-इन्धनानि प्रज्वालयन्ति स्म।

॥ इति वार्ता:॥